# संस्कृत-वार्ता:

**दिनाङ्क :- 31.05.2024** **सायम् - 06:20**

## आदौ-मुख्यवार्ता:

- लोकसभानिर्वाचने अन्तिमचरणस्य च मतदानस्य सर्वाणि सज्जतानि सम्पन्नानि। अस्मिन् चरणे सप्तसु रास्ज्येषु एकस्मिन् केन्द्रशासितक्षेत्रे च समेत्य सप्तपञ्चाशत्- आसनेषु मतदानं भविष्यति।
- प्रधानमन्त्रिण: नरेन्द्रमोदिन: भाजपेतिदलस्य नेता केन्द्रीयमन्त्रिण: च अनुरागसिंह ठाकुरस्य कांग्रेसनेतु: विक्रमादित्य सिंहस्य तृणमूलकांग्रेसस्य च अभिषेकबनर्जी इत्यस्य च भाग्यनिर्णयो श्व: ई.वी.एम. यन्त्रे स्थापितो भवेदिति।
- मणिपुरराज्ये जलौधस्थिति: नैरन्तर्येण प्रवर्धते।
- अद्य विश्व उग्रताम्बूल निषेध दिवस:।
- भारतीय-मुष्टामुष्टि-महासंघ: बी.एफ्आई इति विश्व-मुष्टामुष्टिसंघस्य सदस्यतायै सहमतो जात:।

## लोकसभानिर्वाचन

लोकसभानिर्वाचने सप्तमस्य अन्तिमचरणस्य च मतदानस्य सर्वाणि सज्जतानि सम्पन्नानि। अस्मिन् चरणे श्वः सप्तसु रास्ज्येषु एकस्मिन् केन्द्रशासितक्षेत्रे च समेत्य सप्तपञ्चाशत्- आसनेषु मतदानं भविष्यति। मतगणना जूनमासस्य चतुर्थे दिनाङ्के भविष्यति। अस्मिन् चरणे उत्तरप्रदेशे, पञ्जाबे च त्रयोदश-त्रयोदश, पश्चिमबङ्गाले नव, बिहारे अष्ट, ओडिशा षट्, हिमाचलप्रदेशे चतुर्, झारखण्डे त्रि, चण्डीगढे एक- आसनेषु मतदानं भविष्यति। मतदान प्रात: सप्तवादने प्रारप्स्यते। सायं पंच वादनं यावत् प्रचलिष्यति। निर्बाधाय पारदशिने च मतदानाय निर्वाचन-आयोगेन व्यापकानि प्रबंधनानि कृतानि। मतदानकेन्द्रेषु आवास-आच्छदक: पेयजलम्, शौचालय:, चक्रासन्दिका, विद्युत्-एषां उचिता व्यवस्था विहिता।

## प्रधानमन्त्री-विवकानन्द:

प्रधानमन्त्रिण: नरेन्द्रमोदिन: भाजपेतिदलस्य नेता केन्द्रीयमन्त्रिण: च अनुररागसिंह ठाकुरस्य कांग्रेसनेतु: विक्रमादित्य सिंहस्य तृणमूलकांग्रेसस्य च अभिषेकबनर्जी इत्यस्य च भाग्यनिर्णयो श्व: ई.वी.एम. यन्त्रे स्थापितो भवेदिति। प्रधानमन्त्री नरेन्द्रमोदी अद्य स्वामि-विवेकानन्द-स्मारके पञ्चचत्वारिंशत्-होराणां ध्यानस्य द्वितीयं दिवसं प्रति अस्ति। असौ ह्य: कन्याकुमारीं सम्प्राप्तवान्। ध्यानमग्नात् पूर्वं असौ भगवती-अम्मन-मन्दिरस्य भ्रमणं पूजांच कृतवान्। अवधेयं वर्तते यत् असौ केसरवर्णीय-परिधाने ध्यानं कृतवान्। यस्मिन् ध्यान-मण्डपे त्रिसप्ततिवर्षीय: नेता ध्यानमानो भवति तस्य विषये एवं कथ्यते यत् इदं तत् स्थानमस्ति यत्र स्वामि-विवेकाननन्दवर्येण द्विनवत्यधिक अष्टादशशत-तमे वर्षे ध्यानं कृतम्। एष: महहाभाग: तस्मिन्नेव स्थाने सूर्याघंअनुष्ठानं च कृतम्। कन्याकुमारीस्थलं भारतस्य दक्षिणदिशिस्थितं वर्तते, इदं मङ्गलं स्थानमपि वर्तते यत्र बङ्गालखाति: अरबसागर: हिन्दमहासागरश्च परस्परं मिलन्ति।

## मणिपुर-जलप्लावस्थिति:

मणिपुरराज्ये जलौधस्थिति: नैरन्तर्येण प्रवर्धते। जलौधेन इम्फालनगरं कष्टकरं जातम्। साम्प्रतं यावत् त्रय जना मृता: अन्यश्च एक: विलुप्त: अनया स्थित्या अष्टाशीति-सहस्राधिकैकलक्षं जना: प्रभाविता: जाता:। सम्पूर्णे स्थले केन्द्रीयबलं-सेना च साहाय्योद्धार-कार्येषु संलग्नौ स्त:। प्रभावितान्च जनान् साहाय्यशिबिरेषु नेष्यत:।

## World No Tobacco Day

अद्य World No Tobacco Day दिवस: अमान्ये। अर्थात् विश्व उग्रताम्बूल निषेध दिवस:।

## भारतर्तु-विज्ञान विभाग:

भीषणातपे अपचिते: अनन्तरमपि देशस्य उत्तर-पश्चिम-भागेन उष्णप्रकोप: सह्यते। आकाशवाण्या सह वार्तां कुर्वन् भारतर्तु-विज्ञान-विभागस्य वैज्ञानिक: डॉ.आर.के.जेनामणि: संसूचितवान् यत् तापमाने न्यूनतानन्तरं पञ्जाबभागेषु उष्णलहरी यथावदेव भविष्यति। हरियाणा-राजस्थान-उत्तरप्रदेश-बिहार-छत्तीसगढ़-ओडिशा-राज्यानां केषुचित्।

## भारतं-निकारागुआ

भारत-निकारागुआ-देशौ अद्य द्विपक्षीयविषयाणां पारस्परिक-कल्याणस्य वैश्विक-प्रसङ्गेषु चर्चां विहितवन्तौ। एकस्मिन् अन्तर्जालीयसन्देशे विदेशमन्त्री डॉ. एस. जयशंकर: उदीरितवान् यत् निकारागुआया: विदेशमन्त्री डेनिस-मानकाडा-कोलिंड्रेस इत्येष: अद्य दूरभाषमाध्यमेन तेन सह वार्तां साधितवान्।

## दिल्ली-न्यायालय:

दिल्ल्या: न्यायालय: बेबीकेयर न्यू-बॉर्न-अस्पताल-आख्यस्य चिकित्सालयस्य स्वामिनं एकं सह-आरोपिणं च चतुर्दशदिनानि यावत् न्यायिक-निग्रहणे प्रेषितवान्। कानिचित् दिनानि पूर्वं अस्मिन् चिकित्सालये भयावह-आग्नौ सप्त-शिशूनां मृत्यु: अभूत्। चिकित्सालयस्य स्वामीनं नवीन खिचीं अत्र कर्तव्यें सन्नद्धं कर्मचारिणं च निज-चिकित्साललये अग्नि-प्रज्वलन-कारणात् निग्रहणं कृतम्।

## जम्मू-कश्मीर-अख्नूर दुर्घटना

जम्मू-कश्मीरे प्रशासनम् अद्य क्षेत्रीय-परिवहन-अधिकारी कठुआयां सन्नद्धं यान्त्रिक-वाहन-निरीक्षकेण सह षड् अधिकारिण: निलम्बिता: ते तत्काल-प्रभावेण जम्मू-कश्मीरस्य जम्मू-परिवन-आयुक्त-कार्यालयम् सम्बद्धम् अकुर्वन्। अस्माकं जम्मू-वार्ताहरैण सूचितं यत् जम्मू-कश्मीरे ह्य: बस-दुर्घटना संजाता राजस्थानस्य उत्तर-प्रदेशस्य च द्वाविंशति तीर्थ-यात्रिण: मृत्युमुपगता, ऊनसप्तति: जनाश्च आहता:।

## अमरीका-आयुधा:

अमरीकादेशीय: राष्ट्रपति: जो. बाइडन प्रशासने यूक्रनाय अमरीकाद्वारा प्रदत्तात् आयुधान् रूसदेशस्य अन्तस्थिरक्षेत्रेषु आक्रमणाय अनुमति: प्रदत्ता। सञ्चारसूचनानुसारि खार्किवक्षेत्रे रूसदेशस्य सुदृढस्थितिं युद्धरणे च यूक्रेनस्य प्रतिकेलपरिस्थितिं अवलोक्य निर्णयोऽयं निर्णीत:।

## दिल्ली-न्यायालय:

दिल्ली-उच्च-न्यायालय: स्वाति-मालीवालस्य उत्पीडन-प्रकरणे दिल्ल्या: मुख्यमन्त्रिण: अरविन्द केजरीवालस्य निकटवर्तिन: सहयोगिन: बिभव कुमारस्य निग्रहणस्य विरोधस्थां याचिकां संसद: सदस्यै: विधानसभायाश्च सदस्यै: सम्बद्धानां प्रकरणानां श्रवणकर्तारं श्रवण-पीठं स्थानानान्तरितम्।

## मुष्टामुष्टि-विश्वस्तर□

भारतीय-मुष्टामुष्टि-महासंघ: बी.एफ़आई इति विश्व-मुष्टामुष्टिसंघस्य सदस्यतायै सहमतोजात:। सदस्यताया आवेदनं बी.एफ.आई. इत्येतस्य सामान्य-सभया अनुमोदितम्। अपि च विश्व-मुष्टामुष्टि-संघस्य कार्यकारी-मण्डलेन पुष्टि: भविष्यति। विश्व-मुष्टामुष्टि संघ: त्रयोविंशत्यधिक-द्विसहस्रतम् वर्षस्य अप्रैलमासे उद्घाटित:। अस्योद्देश्यं मुष्टामुष्टि: ओलम्पिकस्य केन्द्रे स्थापनं अस्तीति।

## सिंगापुर

सिंगापुर-बैडमिटन-चतुर्विंशत्यधिक-द्विसहस्रे त्रिसा जॉली, गायत्री-गोपी-चन्दस्य अनयो, भारतीय-महिला-युगल किम सो योग, कॉन्ग ही योन्ग अनयो, दक्षिण-कोरियाया: युगलं पादोपान्त्यचक्रे अष्टादश-एकविंशति, एकविंशति-नवदश, चतुर्विंशति-द्वाविंशति अङ्कानां पुरस्तात् पराजित्य उपान्त्यचक्रे स्वस्थानं स्थापितवत्। स्पर्धेयं नवदशकलोत्तर एकहोरा यावत् प्रचलिता।

**।। इति वार्ता: ।।**